दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लतृतीया
माघ 08 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-90 | 1 | जनवरी 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशस्य १३० शासकीयविद्यालयेषु सीबीएसई पाठ्यक्रमः, ५६० पदानि पूर्यन्ते

4 सर्वकारीय- चिकित्सालयेषु गुणवत्तापूर्णानि औषधानि उपलभ्यन्ते, शतकोटि-रूप्यकाणां निविदाः शीघ्रमेव निर्गताः भविष्यन्ति- मुख्यमंत्री

5 मातुः सरस्वत्याः आराधनायाः महापर्वः बसन्तपञ्चम्याः पुण्यकालः २३ जनवरी प्रातः ०२:२९ वादनात्- प्रो. बिहारीलालः शर्मा

## सुभाषितम्

**एकः शत्रुर्न द्वितीयोऽस्ति शत्रुः,**
**अज्ञानतुल्यः पुरुषस्य राजन्।**
**येनावृतः कुरुते संप्रयुक्तः,**
**घोराणि कर्माणि सुदारुणानि।।**
**-महासुभषितसंग्रहः**

भावार्थः- हे राजन्! अज्ञान के समान मनुष्य का दूसरा कोई शत्रु नहीं है क्योंकि इसके प्रभाव से ही वह अनेक अत्यन्त बुरे और क्रूर कर्मों को करने में संलग्न रहता है।

## भारतं यूरोपीयसङ्घं च मुक्तव्यापारसन्धौ हस्ताक्षरं कर्तुं प्रवृत्तौ स्तः : उर्सुला फॉन् डेर् लायन




हिमसंस्कृतवार्ता। यूरोपीय-आयोगस्य अध्यक्षा उर्सुला फॉन् डेर् लायन इत्यनया उक्तं यत् भारतं यूरोपीयसङ्घं च मुक्तव्यापारसन्धौ हस्ताक्षरं कर्तुं प्रवृत्तौ स्तः। सर्वसन्धीनां माता इति सा वर्णितवती । स्विट्ज़र्लैण्ड-देशस्य दावोस्-नगरे विश्व-आर्थिक-मञ्चे वदन्त्याः लायन-महोदयायाः दावोस्-नगरस्य अनन्तरं आगामिसप्ताहान्ते भारतं गमिष्यामि इति घोषितम्। परन्तु कार्यं अवशिष्टम् अस्ति इति सा अवलोकितवती । सा व्याख्यातवती यत् एतेन द्वि अर्बुद्जनानाम् एकं विपण्यं निर्मितं भविष्यति, यत् विश्वस्य आहत्य जीडीपी इत्यस्य प्रायः चतुर्थांशं प्रतिनिधयति । लायन् महोदयया उक्तं यत् यूरोपदेशः द्रुतगत्या वर्धमानैः देशैः सह अस्य शताब्द्याः आर्थिकमहाशक्तैः सह व्यापारं कर्तुम् इच्छति। यूरोपीयपरिषदः अध्यक्षः एण्टोनियो कोस्टा, सुश्री लायन् च जनवरी २५ तः २७ पर्यन्तं भारतस्य राज्ययात्रायां भविष्यति। अस्मिन् वर्षे गणतन्त्रदिवसस्य उत्सवे सा मुख्यातिथिः अस्ति। भारत-यूरोपीयसङ्घस्य शिखरसम्मेलनस्य अपि सा संयुक्तरूपेण अध्यक्षतां करिष्यति।

## उपराष्ट्रपतिः सी.पी. राधाकृष्णन नवदेहल्यां महादेवदेसाई पुस्तकालयविस्तारस्य उद्घाटनं कृतवान्

**हिमसंस्कृतवार्ताः** - उपराष्ट्रपतिः सी.पी. राधाकृष्णन नवदेहल्यां महादेवदेसाई पुस्तकालयविस्तारस्य उद्घाटनं कृतवान् । अस्मिन् अवसरे तेन "प्रबुद्धतायाः युगः महात्मागान्धिनः दृष्टिः" इति पुस्तकं प्रकाशितम् । उपराष्ट्रपतिः गान्धी आश्रमे हरिजन सेवकसंघस्य भ्रमणं कृतवान्। सी.पी. राधाकृष्णनवर्येणोक्तं यत् पुस्तकालयाः सामाजिकपरिवर्तनस्य वाहनम् अस्ति। सः अवदत् यत् ज्ञानं चरित्रं, चेतनां, सामाजिकदायित्वं च आकारयति। सः हरिजनसेवकसंघस्य समाजस्य समर्पिता सेवायाः अपि प्रशंसाम् अकरोत् ।

## केन्द्रसर्वकारेण केन्द्रीयमोटरवाहननियमानां (द्वितीयसंशोधनं) नियमाः २०२६ अधिसूचिताः

**हिमसंस्कृतवार्ताः** - केन्द्रसर्वकारेण टोलप्लाजास्थानकेषु उपयोक्तृशुल्क-भुगतानस्य अनुपालनं सुदृढं कर्तुं केन्द्रीयमोटरवाहननियमानां (द्वितीयसंशोधनं) नियमाः २०२६ इति अधिसूचिताः । एतेषाम् उद्देश्यं उपयोक्तृशुल्कानुपालनं सुदृढं कर्तुं, इलेक्ट्रॉनिकटोलसंग्रहणस्य कार्यक्षमतां वर्धयितुं, राष्ट्रियराजमार्गेषु उपयोक्तृ-शुल्कस्य चौरकार्यं निवारयितुं च अस्ति । पथपरिवहनराजमार्गमन्त्रालयेन उक्तं यत् एते संशोधनाः भारतस्य राष्ट्रियराजमार्गप्राधिकरणस्य(एनएचएआ) देशे सर्वत्र राष्ट्रियराजमार्गजालस्य स्थायिविकासाय, अनुरक्षणाय च पारदर्शी प्रौद्योगिक्याधारितं च टोलव्यवस्थां प्रवर्तयितुं साहाय्यं करिष्यन्ति। नियमानुसारं यावत् राशिः उपयोक्तृशुल्कं न दत्तं तावत् वाहनस्य स्वामित्वस्य स्थानान्तरणस्य, अन्तरराज्यस्थापनस्य च आपत्तिरहितप्रमाणपत्रं निर्गतं भविष्यति। अपि च, संशोधितनियमासु अनिवार्यं भवति यत् राष्ट्रिय-अनुज्ञापत्रं प्राप्तुं इच्छन्तीनां वाणिज्यिकवाहनानां उपयोक्तृशुल्कस्य राशिः अदेया न भवितुमर्हति।

## केन्द्रीयसञ्चारमन्त्री ज्योतिरादित्य एम. सिन्धिया इत्यनेन भारतसञ्चरनिगमलिमिटेड इत्यस्य तृतीयत्रिमासेभ्यः कार्यप्रदर्शनस्य समीक्षा कृता




**हिमसंस्कृतवार्ताः** - केन्द्रीयसञ्चारमन्त्री ज्योतिरादित्य एम. सिन्धिया इत्यनेन नवदेहल्यां चालूवित्तीयवर्षस्य तृतीयत्रिमासे भारतसञ्चरनिगमलिमिटेड इत्यस्य कार्यप्रदर्शनस्य समीक्षा कृता। संगोष्ठ्यां मन्त्री मुख्यसेवागुणवत्तामापदण्डानां समीक्षां कृतवान्, यत्र मोबाईलजालस्य उपलब्धता, कार्यप्रदर्शनस्य समयः च सन्ति । श्री सिन्धिया इत्यनेन अनेकेषां दूरसंचारवृत्तानां कार्यप्रदर्शनस्य उल्लेखः कृतः, येषु मोबाईल बेस ट्रांसीवर स्टेशन (MBTS) इत्यस्मिन् त्रैमासिकरूपेण महत्त्वपूर्णः सुधारः दृश्यते। केरल, तमिलनाडु, पूर्वोत्तरप्रदेशः, कर्नाटकः, पञ्जाबः, गुजरातः, आन्ध्रप्रदेशः, कोलकाता, हिमाचलप्रदेशः, उत्तराखण्डः च अस्मिन् क्षेत्रे प्रमुखवृत्ताः इति चिह्निताः सन्ति । सः बीएसएनएल-नेतृत्वेन क्षेत्र-एककेभ्यः च आग्रहं कृतवान् यत् ते गतिं निर्वाहयन्तु, संगठनात्मकलक्ष्याणि प्राप्तुं समन्वितेरूपेण कार्यं कुर्वन्तु ।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## स्पेनदेशस्य विदेशमन्त्री जोसे मनुएल अल्बारेस अद्य राष्ट्रपतिना द्रौपदीमुर्मू इत्यनया सह मेलनं करिष्यति



**हिमसंस्कृतवार्ताः** - स्पेनदेशस्य विदेशमन्त्री जोसे मनुएल अल्बारेस गतदिवसे द्विदिनस्य आधिकारिकयात्रायाः कृते नवदेहलीं सम्प्राप्तः। अल्बारेस महोदयः अद्य विदेशमन्त्री डॉ. एस. जयशंकरेण तथा राष्ट्रपतिभवने राष्ट्रपति द्रौपदी मुर्मू इत्यनया सह मेलनं करिष्यति।

# हिमाचलप्रदेशस्य १३० शासकीयविद्यालयेषु सीबीएसई पाठ्यक्रमः, ५६० पदानि पूर्यन्ते




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश- सर्वकारेण सीबीएसई-संलग्नतायै स्वीकृतानां १३० शासकीय-सीबीएसई- संलग्न- विद्यालयानां कृते सीबीएसई-संलग्न- विद्यालय- उत्कृष्टता- योजना तत्क्षणप्रभावेन प्रवर्तयितुम् आदेशाः निर्गताः। एतस्मिन् विषये शिक्षासचिवेन राकेशकंवरमहाभागेन अधिसूचना प्रकाशिता। सर्वकारेण २५ सितम्बर २०२५ तमे दिने निर्गते आदेशे १०० विद्यालयेषु विविधवर्गेषु ५६० पदानां सृजनं कृतम्। एतानि पदानि सीबीएसई- संलग्न-विद्यालयेषु उत्कृष्टता- योजनायाः उपयोजनायाः अन्तर्गतं पूर्यन्ते। एतेषु विद्यालयेषु अध्यापकानां नियुक्तेः कारणेन मूल-काडरे याः रिक्तयः भविष्यन्ति अथवा एतेषु विद्यालयेषु अवशिष्टाः रिक्तयः, ताः जॉबट्रेनीरूपेण प्रत्यक्ष-नियुक्तिमार्गेण पूर्यन्ते। शैक्षणिकसत्रात् २०२६-२७ आरभ्य प्रदेशस्य १३० विद्यालयेषु सीबीएसई पाठ्यक्रमः अध्याप्यते। शिक्षाविभागेन अध्यापकनियुक्तिः, सेवानियमाः, स्थानान्तरणनीतिः, विशेष-भत्तानि इत्यादिषु विस्तृताः प्रावधानाः निश्चिताः।

## ३० विद्यालयेषु अतिरिक्त-अध्यापन-पदानि सृज्यन्ते

सर्वकारी- अधिसूचनानुसारं प्रधानाचार्य- योजनायां निर्दिष्टैः मानदण्डैः १९ जनवरी २०२६ दिनाङ्कस्य पत्रेण स्वीकृतानां ३० विद्यालयानां कृते पूर्वस्वीकृत- पदानाम् अतिरिक्तं अध्यापन-पदानां सृजनं कृत्वा तानि पूर्यन्ते। पदसंख्या विभागेन निश्चितीभविष्यति तथा सर्वकारस्य अनुमोदनानन्तरं पृथक् सूच्यते। एतेषु १३० विद्यालयेषु प्रत्येकस्मिन् एक-एक विशेष-शिक्षक (स्पेशल एजुकेटर) इति १३० पदानि सृज्यन्ते तथा जॉबट्रेनीरूपेण प्रत्यक्ष- नियुक्त्या पूर्यन्ते। प्रत्येकस्मिन् विद्यालये एक-एकं चौकीदार, स्वच्छताकर्मचारीपदं सृज्यते, यानि अपि जॉबट्रेनीरूपेण पूर्यन्ते।


## आङ्ग्लभाषा, गणितविषययोः ४००-४०० अध्यापकानां नियुक्तिः

सीबीएसई- संलग्न- विद्यालय- उत्कृष्टता- योजनायां राज्य- चयन- आयोगस्य माध्यमेन ४०० आङ्ग्ल-भाषा- अध्यापकानां ४०० गणित- अध्यापकानां नियुक्तिः भविष्यति। एते अध्यापकाः अस्थायी-आधारेण पञ्चवर्ष- कालावधिं यावत् निश्चित- मानदेयेन /समेकित- राश्या नियुक्ताः भविष्यन्ति। प्रतिमासं ३०,००० रूप्यकाणां निश्चितं मानदेयं प्रतिवर्षं १० मासानां कृते देयं भविष्यति। विभागेन एतेषां अध्यापकानां द्वारा अध्याप्यः विशेषः पाठ्यक्रमः निर्मास्यते, येन आङ्ग्ल- भाषायां, गणिते विद्यार्थिनां दक्षता तथा अधिगमस्तरः वर्धेत। अयं पाठ्यक्रमः विद्यमान- पाठ्यक्रमात् अतिरिक्तः भविष्यति। विद्यार्थिनां संख्यानुसारं एते अध्यापकाः १३० विद्यालयेषु तैनाताः भविष्यन्ति, आवश्यकतानुसारं अन्येषु शासकीय- विद्यालयेष्वपि नियोजितुं शक्यन्ते।

## एते वर्गाः बाह्यसेवा-नियोजनम् (आउटसोर्सिंग) आधारेण पूर्यन्ते

योगशिक्षकः, परामर्शदाता सहकल्याण-शिक्षकः, केटरिङ-सुपरवाइजरः, आया- एतेषां सेवाः बाह्यसेवा-नियोजनम् (आउटसोर्सिंग) आधारेण (१३० विद्यालयेषु प्रत्येकस्मिन् एक-एकः) नियुक्ताः भविष्यन्ति। कार्मिक- विभागेन निर्गतया सामान्य- पीटी-एमटीडब्ल्यू- नीत्या अनुसारं ३९० अंशकालिक-बहुकार्य- कार्मिकाः (प्रत्येकस्मिन् १३० विद्यालयेषु त्रयः) नियुक्ताः भविष्यन्ति। शिक्षाविभागः आवश्यकतानुसारं एतेषु १३० विद्यालयेषु विविधवर्गेषु अतिरिक्त-अध्यापन- पदानां सृजनं कर्तुं शक्नोति, यानि एतैः पदैः अतिरिक्तानि भविष्यन्ति। एते पदाः हिमाचलप्रदेशे सीबीएसई- संलग्न- विद्यालयानां कृते अध्यापकाणां उप- काडर- निर्माण- उपयोजनायाः अन्तर्गतं निश्चित-प्रक्रियानुसारं पूर्यन्ते। योजनायां निर्दिष्टसंख्यानुसारं अशैक्षणिक- कर्मचारिणाम् आवश्यकता यथा-लिपिक/ जेओए- प्रथमः, वरिष्ठ-सहायकः, अधीक्षकः ग्रेड- १, २ च, विभागान्तर्गत- पदानाम् उन्नयन-युक्तिकरणयोः माध्यमेन पदानि सृज्य पूर्यन्ते।

# AIIMS BILASPUR - औषधं विना भविष्यति मानसरोगोपचारः; एम्स-बिलासपुरमध्ये 'न्यूरो बायोफीडबैक' यन्त्रं स्थापयिष्यते




**हिमसंस्कृतवार्ताः - बिलासपुरम्।** आयास-निद्रा-चिन्तादिभिः ग्रस्तानां रुग्णानां मस्तिष्के कः ऊहापोहः प्रचलति, तस्य अध्ययनं चिकित्सा च अधुना सरला भविष्यति। 'अखिलभारतीय-आयुर्विज्ञान-संस्थानम्' (एम्स) बिलासपुरस्य 'न्यूरोलॉजी' विभागे 'न्यूरो एवं बायोफीडबैक' यन्त्रं संस्थापयितुं गच्छति। एतदर्थं संस्थानप्रबन्धनेन निविदा-प्रक्रिया (Tender process) आरब्धा। अनेन मानसिकायास-अनिद्रा-तन्त्रिकासम्बद्धसमस्याभिः पीडिताः रुग्णाः अधुना एम्स-मध्ये एव उपचारं प्राप्स्यन्ति।

उल्लेखनीयं यत् एषा अत्याधुनिकप्रविधिः मस्तिष्काङ्गानां शरीरस्य च मध्ये जायमानानां क्रियाणां अवबोधने आधारिता अस्ति। अस्य यन्त्रस्य माध्यमेन मस्तिष्कस्य तरङ्गैः सह शरीरस्य आन्तरिकक्रियाणाम् (यथा हृदयगतिः, श्वसनं, तनावस्तरः च) वैज्ञानिकं विश्लेषणं करिष्यते। अस्य आधारेण रुग्णाय विशेषप्रशिक्षणं दीयते, येन सः स्वस्य मानसिक-शारीरिक-असंतुलनं ज्ञात्वा स्वयं तस्य उपरि नियन्त्रणं कर्तुं शिक्षेत्।

### औषधेषु निर्भरता न्यूनीभविष्यति

विशेषज्ञानां मतं अस्ति यत् न्यूरो-बायोफीडबैक प्रविधिः औषधेषु निर्भरतां न्यूनीकर्तुं सहायिका भवितुं शक्नोति। एषा पद्धतिः रुग्णाय प्राकृतिकरूपेण मानसिकशान्तिं सन्तुलनं च प्रदास्यति। अस्य आरम्भस्य लाभः केवलं रुग्णतापर्यन्तं सीमितः नास्ति; छात्रेभ्यः, युवकेभ्यः, कर्मचारिभ्यः च एषा प्रविधिः अतीव उपयोगिनी सिद्धा भविष्यति। ध्यानस्य स्मरणशक्तेः च विकासे तथा कार्यक्षमतायाः वर्धने अपि एतद् यन्त्रं सहायकं मन्यते। एतेन हिमाचलस्य समीपस्थक्षेत्राणां च रुग्णाः स्थानीयस्तरे एव श्रेष्ठं उपचारं प्राप्स्यन्ति।

### कथं कार्यं करोति एतद् यन्त्रम्?

एषा तादृशी प्रविधिः अस्ति यस्यां औषधं विना रुग्णः स्वशरीरस्य अनैच्छिक-क्रियाः (Involuntary actions) नियन्त्रयितुं शिक्षते। अत्र 'सेंसर' (Sensors) साहाय्येन शरीरस्य कार्याणां यथा- हृदयस्पन्दनं, श्वसनगतिः, मांसपेशीनां तनावः, स्वेदग्रन्थीनां सक्रियता च इत्यादीनां निरीक्षणं क्रियते।

एतत् विशेषरूपेण मस्तिष्कस्य तरङ्गेषु केन्द्रितं भवति। एषा प्रविधिः मस्तिष्कस्य सक्रियतां 'रीयल-टाइम' (तत्क्षणं) प्रदर्शयति, येन रुग्णः स्वमस्तिष्कं शान्तं केन्द्रितं च कर्तुं समर्थः भवति।

# पंचायतनिर्वाचनस्य सज्जतायै त्वरिता, क्रमसूची- आदि औपचारिकताः सम्पन्नां कर्तुं कथितम्

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-राज्यनिर्वाचन- आयोगः, राज्यसर्वकारः पंचायतीराजसंस्थानां निर्वाचनं कर्तुं तत्परः अस्ति। मंगलवासरे राज्यनिर्वाचन-आयुक्तस्य कार्यालये आयोजितायां सभायां अधिकारिभ्यः निर्देशः दत्तः यत् ते २८ फरवरीतः पूर्वं निर्वाचनसम्बद्धाः सर्वाः औपचारिकताः सम्पन्नां कुर्वन्तु। विधानसभाबजटस्य तिथौ अपि आयोगस्य दृष्टिः वर्तते। यदि फरवरीमासस्य अन्ते यावत् सत्रस्य समाप्तिः भवति तर्हि तदनन्तरं पंचायतक्षेत्राणाम् आचारसंहिता घोषितुं शक्यते। आयोगेन पंचायतीराजविभागाय अपि निर्देशः दत्तः यत् सः नवपञ्चायतानां कृते यत्किमपि पुनर्सङ्घटनं पुनर्सीमाकरणं च २८ फरवरीतः पूर्वं सम्पन्नं करोतु। येषु पंचायतेषु पुनर्सङ्घटनं पुनर्सीमाकरणं च कर्तव्यं तत्र विहाय अन्यपञ्चायतानां कृते निर्मितानां मतदातासूचीनां मुद्रणम् अधुना सम्पन्नं कर्तुं शक्यते। उच्चन्यायालयेन हिमाचलस्य पंचायतीराजसंस्थानां निर्वाचनं ३० अप्रैलतः पूर्वं करणीयम् इति निर्देशः दत्तः। उच्चन्यायालये प्रतिक्रियायाः सज्जीकरणाय एषा महत्त्वपूर्णा सभा आयोजिता आसीत्।

### पंचायतनिर्वाचने ५६ लक्षमतदातारः मतदानं करिष्यन्ति

सर्वकारीयाधिकारिभिः सह मेलनात् पूर्वं राज्यनिर्वाचन-आयोगस्य अधिकारिभिः, कर्मचारिभिः च सह समागमः अभवत्। अस्मिन् सत्रे आयोगस्य आयुक्तः अनिलखाची निर्वाचनस्य सज्जतायाः समीक्षां कृतवान्। पंचायतनिर्वाचने ५६ लक्षमतदातारः मतदानं करिष्यन्ति इति उक्तम्। परीक्षायाः समाप्तेः अनन्तरं विद्यालयेषु मतदानकेन्द्राणि स्थापितानि भविष्यन्ति। प्रत्येकं वार्डं प्रति २० मतदातासूचिकाः प्रेषिताः भविष्यन्ति।

# हिमाचलप्रदेशस्य डॉ. उदयभानुना शल्यचिकित्सायां कीर्तिमानः स्थापितः,



हिमसंस्कृतवार्ताः- डॉ. पद्मनाभ मण्डी। हिमाचलप्रदेशस्य मण्डी-नगरनिवासी प्रख्यातः स्त्रीरोगविशेषज्ञः डॉ. उदयभानुः लेप्रोस्कोपिकविध्या एका अतीव जटिला शल्यक्रिया कृत्वा विश्वकीर्तिमानं निर्मितवान्। माण्डव- चिकित्सालये कार्यरतः डॉ. उदयभानुः लेप्रोस्कोपस्य सहाय्येन ५.२१ किलोग्राम-भारयुक्तं विशालं फाइब्रॉएड निष्कास्य नूतनाम् उपलब्धिं प्राप्तवान्। एषा उपलब्धिः न केवलं माण्डव-चिकित्सालयस्य, अपि तु सम्पूर्णस्य मण्डी- जनपदस्य चिकित्साक्षेत्रे नूतनाम् अभिधानं निर्माति। अनेन सिद्धं भवति यत् अद्य लघुनगरेषु, पर्वतीयप्रदेशेषु चापि विश्वस्तरीयाः चिकित्सासुविधाः, जटिलाः शल्यक्रियाः सम्भवाः सन्ति।

## सम्पूर्णं प्रकरणं ज्ञायते-

वास्तवतः चत्वारिंशद्वर्षीया एका महिला उदरशोथस्य शिकायतां कृत्वा डॉ. उदयभानुं समुपस्थिता। तस्याः उदरः गर्भिणीव दृश्यते स्म, यथा गर्भे अतीव भारयुक्तं शिशुं वर्धते। किन्तु परीक्षणानन्तरं गर्भाशये अतीव विशालं फाइब्रॉएड् दृश्यते स्म। तदा चिकित्सकेन तद् लेप्रोस्कोपिक- विध्या निष्कासयितुं निर्णयः कृतः। एतादृशं भारीयसं फाइब्रॉएड लेप्रोस्कोपिक- विध्या निष्कासयितुं सामान्यतः दुष्करं भवति, अतः चिकित्सकेन आपत्कालीनरूपेण ओपन- शल्यक्रियायाः अपि सिद्धता कृता आसीत्। तथापि स्वस्य दीर्घानुभवस्य तथा दलस्य कुशलसहयोगस्य बलात् डॉ. उदयभानुः लेप्रोस्कोपस्य माध्यमेन एव तद् सुरक्षिततया बहिः निष्कासितवान्। डॉ. भानुना कथितं यत् तस्य फाइब्रॉएडस्य भारः ५.२१ किलोग्रामः आसीत्, शल्यक्रियानन्तरं महिला सम्पूर्णतया स्वस्थाऽस्ति।


## लिम्का-बुक ऑफ रिकॉर्ड्स मध्ये पञ्जीकरणं भविष्यति- भानुः

डॉ. उदयभानुः अवदत् यत् एषा शल्यक्रिया कीर्तिमानार्थं न कृता, अपि तु स्वस्य चिकित्सीय- उत्साहस्य फलम् आसीत्। अद्यावधि सः १०,००० अधिकाः लेप्रोस्कोपिक-शल्यक्रियाः सम्पन्नवान्।साहित्यावलोकनानन्तरं ज्ञातं यत् यत् फाइब्रॉएड तेन निष्कासितं तत् विश्वस्य द्वितीयं विशालतमं फाइब्रॉएड अस्ति। इटलीदेशे अद्यापि प्रथमस्थानं वर्तते, यत्र ५.३० किलोग्राम-परिमाणस्य फाइब्रॉएडस्य निष्कासनं कृतम्। पूर्वं चेन्नै-नगरे डॉ. सुरक्षितेन ४.५ किलोग्राम-भारयुक्तं फाइब्रॉएड निष्कास्य द्वितीयस्थानं प्राप्तम्। अधुना तु मण्डीनिवासी डॉ. उदयभानुः ५.२१ किलोग्राम- फाइब्रॉएड निष्कास्य द्वितीयस्थानं प्राप्तवान्। डॉ. भानुना उक्तं यत् एतस्य उपलब्धेः लिम्का-बुक ऑफ रिकॉर्ड्स मध्ये पञ्जीकरणस्य प्रक्रिया आरब्धा अस्ति।

## लघुच्छिद्रैः एतादृशं विशालं फाइब्रॉएड निष्कासयितुं नासीत् सुलभम्

डॉ. भानुः अवदत् यत् एतत् फाइब्रॉएड महिलायाः शरीरे यकृत्-प्रदेशपर्यन्तं विस्तीर्णम् आसीत्। पूर्वं सः लेप्रोस्कोपिकविध्या साढे त्रि-किलोग्राम- परिमाणस्य फाइब्रॉएड अपि निष्कासितवान्। किन्तु लेप्रोस्कोपिक- शल्यक्रियायाम् अवकाशस्य (स्पेसस्य) सदा समस्या भवति, यतः सूक्ष्मछिद्रैः एव अन्तः तस्य अन्वेषणं, छेदनं, सुरक्षिततया बहिः निष्कासनं च कर्तव्यम्। एषा शल्यक्रिया अत्यन्तं जटिला आसीत्, तथापि चिकित्सकीयदलस्य समन्वितसहयोगेन सा सफलतया सम्पादिता।

# जलशक्तिविभागस्य विश्रामगृहाणां पञ्जीकरणसेवा अधुना 'ऑनलाइन' (अन्तर्जालमाध्यमेन);



हिमसंस्कृतवार्ताः- शिमला। उपमुख्यमन्त्री मुकेश अग्निहोत्री महोदयः जलशक्तिविभागस्य विश्रामगृहाणां (Rest Houses) कृते 'ऑनलाइन-आरक्षण-प्रणाल्याः' औपचारिकं शुभारम्भं कृतवान्। एषः आरम्भः 'डिजिटल गवर्नेंस' (वैद्युतीय-शासनम्) इति दिशि एकं महत्त्वपूर्णं पदं वर्तते। अस्मिन् अवसरे मुकेश अग्निहोत्री महोदयः अवदत् यत् अस्याः प्रणाल्याः उद्देश्यं पञ्जीकरणप्रक्रियां सरलां, पारदर्शिनीं, प्रभावशालिनीं च निर्माणं अस्ति, येन विभागीय- अधिकारिभिः सह सामान्यजनाः अपि सुलभतया प्रकोष्ठान् (Rooms) आरक्षितुं शक्नुवन्ति। अस्मिन् अवसरे उपमुख्यमन्त्री उक्तवान् यत् अनया नूतनया व्यवस्थया प्रकोष्ठस्य पञ्जीकरणं केवलं 'एक- क्लिक' (एकवारं नोदनेन) माध्यमेन भविष्यति। सः अवदत् यत् अस्याः प्रणाल्याः प्रमुखा विशेषता 'त्वरितपञ्जीकरणपुष्टिः' (Instant Confirmation) अस्ति, येन पूर्वमेव दीर्घप्रतीक्षायाः सन्देहस्य च अन्तः भविष्यति। आवेदनस्य कतिपयनिमेषेषु एव पञ्जीकरणस्य स्थितिः ज्ञाता भविष्यति। जलशक्तिविभागस्य सचिवः अभिषेकजैन महोदयः अस्य प्रकल्पस्य विस्तरेण सूचनां ददन् अवदत् यत् विभागस्य समीपे सम्पूर्णे प्रदेशे ८७ विश्रामगृहाणि सन्ति, येषु ३२४ प्रकोष्ठाः उपलब्धाः सन्ति।

### शुल्कं, पञ्जीकरणविधिश्च-

पञ्जीकरणार्थं विभागस्य आधिकारिक- जालपुटे (Website) jsv.hp.nic.in अथवा jsvresthouse.hp.gov.in इत्यत्र साक्षात् प्रवेशं (Log in) कृत्वा आवेदनं कर्तुं शक्यते। सः अज्ञापयत् यत्- हिमाचली- अतिथीनां कृते: ५०० रूप्यकाणि प्रतिदिनम्। इतर-हिमाचली- अतिथीनां कृतेः १००० रूप्यकाणि प्रतिदिनम्। अग्रिमराशिः पञ्जीकरणसमये कुलराशेः ५० प्रतिशतम् अग्रिमरूपेण दातव्यं भविष्यति, अवशिष्टा राशिः च 'चेक आउट' (निर्गमन) समये प्रदेया भविष्यति। एतया व्यवस्थया विश्रामगृहाणां उपयोगः वर्धिष्यते विभागस्य आयः अपि वृद्धिं प्राप्स्यति।

**स्वच्छतायै SOP प्रणाल्याः प्रयोगः**

डिजिटल-व्यवस्थया सह विभागः ५० बिन्दूनां मानक- सञ्चालन- प्रक्रियाम् (SOP) अपि आरब्धवान्। अस्य अन्तर्गतं विश्रामगृहाणां सम्भाषणे स्वच्छतायां च विशेषं ध्यानं दत्तम् अस्ति। शय्यानां स्वच्छता, शौचलयनिर्मलता, विद्युत्- उपकरणानां फिटिङ्ग्स-रक्षणं च सुनिश्चितं भविष्यति। एषा व्यवस्था आगन्तुकानां कृते उत्तमं आधारभूत- संरचना पारदर्शिनीं सेवां च प्रदास्यति।

# खेलो-इण्डिया-गेम्स इत्यस्य शीतकालीनसत्रस्य प्रथमचरणस्य लेहनगरे शुभारम्भः

हिमसंस्कृतवार्ताः - खेलो-इण्डिया-गेम्स इत्यस्य शीतकालीनसत्रस्य प्रथमचरणं लद्दाखस्य लेहनगरे आरभ्यते। अस्मिन् संस्करणे प्रशिक्षकाः, तकनीकीसहायककर्मचारिणः च समाविष्टाः १,००० तः अधिकाः पुरुषाः महिलाः च क्रीडकाः भागं गृह्णन्ति । फिगर स्केटिङ्ग इत्यादीनां ओलम्पिक-कार्यक्रमानाम् समावेशः अस्मिन् वर्षे प्रमुखं आकर्षणम् अस्ति । अस्मिन् वर्षे ४७२ क्रीडकाः हिमस्केटिङ्ग-हॉकी-क्रीडायां भागं गृह्णन्ति । खेलो इण्डिया गेम्स् विषये वदन् क्रीडामन्त्री डॉ. मनसुख मण्डविया इत्यनेन उक्तं यत् खेलो इण्डिया शीतकालीनक्रीडायां क्रीडकानां कृते अस्मिन् शिशिरऋतौ स्पर्धायाः अवसरः प्राप्यते। माण्डवियमहोदयः क्रीडकान् एतेषां क्रीडानां लाभं ग्रहीतुं आग्रहं कृतवान्। सः अवदत् यत् आगामिमासे खेलो इण्डिया आदिवासीक्रीडायाः आरम्भात् शीघ्रमेव क्रीडानां विस्तारः भविष्यति, तदनन्तरं देशे सर्वत्र अन्यस्वरूपेषु अपि भविष्यति। एताः क्रीडाः देशे प्रमुखः क्रीडाकार्यक्रमः भविष्यति इति सः अवदत्।

# अहं देशस्य प्रत्येकं कार्यकर्तारं वक्तुमिच्छामि भवान् केवलं कार्यकर्ता नास्ति, अपि तु भवान् राष्ट्रनिर्माणस्य सैनिकः अस्ति-नितिननवीनः





**हिमसंस्कृतवार्ताः- नवदेहली।** भारतीयजनतापक्षस्य सङ्घटनं केवलं व्यवस्था नास्ति, अपि तु एकः संस्कारः अस्ति। अद्य भाजपायाः राष्ट्रियाध्यक्षत्वेन मम निर्वाचनं एकस्य साधारणकार्यकर्तुः असाधारणयात्रायाः सम्मानः, सेवायाः च दृढसङ्कल्पः अस्ति। इति नूतनः राष्ट्रीयाध्यक्षः नितिननवीनः स्वीये आमुखपटले उल्लेखं कृतवान्। असौ अकथयत् यत् अस्य नवीनदायित्वस्य कृते अहं माननीयप्रधानमन्त्रिणं नरेन्द्रमोदीमहोदयं, पूर्वराष्ट्रियाध्यक्षस्य माननीयं श्री जे. पी. नड्डामहोदयं प्रति स्वकृतज्ञतां ज्ञापयामि। अहं तेषां सर्वेषां प्रदेशाणां पक्षस्य वरिष्ठाणां च नेतृणां हृदयतः आभारं प्रकटयामि, यैः अस्य पदस्य कृते मम नाम प्रस्तावितम्। प्रधानमन्त्रिणा नरेन्द्रमोदीमहोदयेन देशं 'विकसितभारतम्' इति निर्मातुं यः सङ्कल्पः दत्तः, तं साकारं कर्तुं वयं सर्वे पूर्णैकतया प्रतिबद्धतया च निरन्तरं कार्यं करिष्यामः। अहं पूर्णगौरवेण आदरपूर्वकं च श्री जे. पी. नड्डा महोदयस्य नेतृत्वस्य कृते तस्य हार्दिकम् आभारं करोमि। तस्य नेतृत्वे सङ्घटनस्य अभूतपूर्वः विस्तारः जातः, कार्यकर्ता-आधारित- राजनीतिः सेवायाः संस्कृतिः च अधिका सुदृढा अभवत्। तामेव सङ्घनात्मकपरम्परां अग्रे नेतुं मम सहसङ्कल्पः अस्ति। भाजपा देशस्य एकमात्रं तादृशं दलं वर्तते यत्र उच्चपदेभ्यः गुरुतरदायित्वेभ्यः च कस्यचित् विशिष्टपरिवारस्य सदस्यत्वम् आवश्यकं नास्ति। अत्र साधारणकार्यकर्ता इति भावः एव महत्तमा योग्यता अस्ति। अस्मिन्नेव सङ्घटने एकस्य सामान्यपरिवारस्य व्यक्तिः देशस्य प्रधानमन्त्री भवितुं शक्नोति, एकः साधारणकार्यकर्ता च राष्ट्रियाध्यक्षसदृशम् उत्तरदायित्वं प्राप्तुं शक्नोति। डॉ. श्यामाप्रसादमुखर्जी महोदयस्य बलिदानात् आरभ्य पं. दीनदयाल उपाध्याय महोदयस्य एकात्ममानववादं यावत्, अटल बिहारी वाजपेयी महोदयस्य आदर्शेभ्यः आरभ्य प्रधानमन्त्रिणः श्री नरेन्द्रमोदी महोदयस्य निर्णायक-दूरदर्शि-नेतृत्वं यावत्, भाजपायाः प्रतिपदं एकस्मिन्नेव सङ्कल्पेन सञ्चालितम् अस्तिः 'राष्ट्रं प्रथमम्'। भाजपा सर्वदा युवाशक्तौ विश्वासं कृतवती, अयं विश्वासः केवलं घोषवाक्येषु सीमितः नास्ति। एतत् सङ्घटनस्य संरचनायां, निर्णयप्रक्रियायां, नेतृत्वनिर्माणे च निरन्तरं दृश्यते। राजनीतिः न तु शतमीटरपरिमितं धावनं (Sprint), अपि तु एका दीर्घा मैराथनस्पर्धा अस्ति। शतमीटरधावने वेगस्य (Speed) परीक्षणं भवति, मैराथन-धावने च सहनशक्तेः (Stamina) परीक्षणं भवति। अतः युवानः धैर्येण सह राजनीतिक्षेत्रे स्थातुम् आवश्यकाः सन्ति। अद्य अहं देशस्य प्रत्येकं कार्यकर्तारं प्रति वक्तुमिच्छामिः भवान् केवलं कार्यकर्ता नास्ति, अपि तु भवान् राष्ट्रनिर्माणस्य सैनिकः अस्ति। भवतः सङ्घर्षः, निष्ठा, परिश्रमः च भारतस्य उज्ज्वलभवितव्यस्य सुदृढा आधारशिला अस्ति। अस्माकं लक्ष्यं स्पष्टं वर्ततेः २०४७ पर्यन्तं भारतं विकसितराष्ट्रं निर्माणं, प्रधानमन्त्रिणः सङ्कल्पस्य च सिद्धिः। एकं तादृशं भारतं निर्मातव्यं यत्र विकासः विरासतः च सहैव अग्रे गच्छेताम्। अहं जानामि यत् एषा यात्रा दीर्घा अस्ति आह्वानानि च आगमिष्यन्ति, परन्तु भाजपायाः कार्यकर्ता कदापि विचलितः न भवति, यतः सः सत्तायाः न, अपि तु सेवायाः सङ्कल्पस्य च राजनीतिं करोति। अहं गर्वमनुभवामि अस्ति यत् अहं अस्य महान् सङ्घटनस्य कार्यकर्ता अस्मि। मयि गर्वः अस्ति यत् अहं भाजपापरिवारस्य अङ्गम् अस्मि। अस्यां यात्रायां भवतां सर्वेषां मार्गदर्शनस्य, स्नेहस्य, सहयोगस्य च अपेक्षा वर्तते।

# संस्कृतभारत्याः ब्रजप्रान्ते एकदिवसीयः संस्कृतभाषाप्रवेशवर्गः







**हिमसंस्कृतवार्ताः- आचार्यदीनदयालशुक्लः।** संस्कृतभारत्याः व्रजप्रान्तस्य हरिगढशाखा षड्विंशत्यधिकद्विसहस्रतमे कृष्टाब्दे प्रथममासस्य अष्टादशे दिनाङ्के रविवासरे हरिगढस्थे सासनीगेट- क्षेत्रवर्तिनि विश्वभारती- सार्वजनिक- विद्यालये एकदिवसीय-संस्कृतभाषाप्रवेशवर्गम् आयोजयत्। कार्यक्रमस्य शुभारम्भः वैदिकमन्त्रोच्चारणेन सह दीपप्रज्वालनेन सरस्वत्याः पूजाऽर्चनया च अभवत्। सर्वप्रथमं कार्यक्रमस्य अध्यक्षा विश्वभारती- सार्वजनिक- विद्यालयस्य प्रधानाचार्या च सुनीतासिंहः अस्मै वर्गाय शुभकामनाः प्राददात्। स्वल्पाहारविरामात् अनन्तरं मथुराविभागस्य संयोजकः श्यामसुन्दरशर्मा प्रशिक्षणकार्यं प्रारभत।

विशिष्टातिथिः वार्ष्णेयमहाविद्यालयस्य संस्कृत-विभागाध्यक्षः देवेन्द्रकुमारः भारतीयसंस्कृतेः संरक्षणार्थं संस्कृतभाषायाः पोषणस्य संवर्धनस्य च आवश्यकतां प्रत्यपादयत्। प्रशिक्षणस्य सञ्चालनं चतुर्षु सत्रेषु अभवत्। येषु संस्कृतजिज्ञासवः संस्कृतभाषायां स्वपरिचयं लिङ्गं वचनं पुरुषः इत्यादिविषयाणां प्रारम्भिकज्ञानेन संस्कृतमध्ययनं प्रोत्साहिताः अभवन्। मध्याह्नभोजनानन्तरं संस्कृतभारत्याः हरिगढजनपदस्य अध्यक्षः डाॅ. बृजेशशास्त्री वर्गं समबोधयत्। सः स्वसम्बोधने संस्कृतस्य वैशिष्ट्यं रेखाङ्कयन् संस्कृतभाषासंवर्धने बलं न्यदधात्। मथुराविभागसंयोजकस्य श्यामसुन्दरशर्मणः कुशले नेतृत्त्वे संयोजने च संस्कृतभाषाप्रवेशवर्गस्य प्रशिक्षणं सम्पन्नम् अभवत्। मध्यकाले वेदप्रकाशपाठकेन सरलानां सुमधुराणां च संस्कृतगीतानां प्रस्तुतिः कृता। वर्गस्य समापनसत्रस्य मुख्यातिथिना हरिगढस्य सासनीगेट क्षेत्रस्थस्य बालगोपालमन्दिरस्य प्रबन्धकेन समाजसेविना व्यवसायिना च अजयशर्मणा कृतम्। अन्ते संस्कृतभारत्याः हरिगढजनपदस्य मन्त्री डाॅ. प्रभाशङ्करशुक्ल अतिथीनां वर्गे आगतानां संस्कृतानुरागिणां विदुषां विश्वभारती-सार्वजनिक- विद्यालयस्य प्रधानाचार्यायाः च अभिनन्दनं धन्यवादम् आभारं च अज्ञापयत्। वर्गेऽस्मिन् लोकेशपचौरी, कपिलकुमारशर्मा, निश्चलगिरिः, विजेन्द्रसिंहः, सुरेन्द्रसिंहः, नकुलचौधरी, सोनीजादोंन, मोहिनी उपाध्याय, उदितनारायणः, करणपालसिंह इत्यादयः अनेके सदस्याः सहभागित्वं स्वीकृतवन्तः।

# स्वामी अद्वैतानन्दगिरिजीमहाभागस्य आयुर्वेदिक-कायकल्प-विषयकं विशेष-व्याख्यानं आयोजितम्




जय-जलाराम-आयुर्वेदिक-चिकित्सा-महाविद्यालये, शिवपुरी-गोधरास्थिते, *“Ayurvedic Kayakalp with Kutipraveśikā Rasāyana” इति विषयं आश्रित्य विशेष-व्याख्यानस्य सफलम् आयोजनं कृतम्। हिमालय-गुहासु दीर्घकालीन-साधनानुष्ठानरतः सुप्रसिद्धः संन्यासी आध्यात्मिक-विचारकश्च स्वामी अद्वैतानन्दगिरिजी* आयुर्वेदस्य कायकल्प-विद्यां, कुटीप्रवेशिक-रसायनस्य महत्त्वं, दीर्घायुषः पुनर्युवनस्य च वैज्ञानिक-आध्यात्मिक-पक्षान् विस्तरेण विवृतवान्।अस्य कार्यक्रमस्य आयोजनं डॉ. दिव्या गोसाई तथा डॉ. रविणा महाभ्यां कृतम्, सम्पूर्णस्य कार्यक्रमस्य सञ्चालनं डॉ. चिराग पुरोहितेन सम्पन्नम्। अस्मिन् कार्यक्रमे ट्रस्टीश्री डॉ. विजय पटेल महोदयः अपि उपस्थितः आसीत्। कार्यक्रमस्य अन्ते डॉ. सीबा प्रसाद महाभागया आभार-प्रदर्शनं कृतम्। अस्य व्याख्यानस्य लाभं महाविद्यालयस्य कर्मचारिणः छात्राश्च उत्साहपूर्वकं प्राप्तवन्तः।

# मातुः सरस्वत्याः आराधनायाः महापर्वः बसन्तपञ्चम्याः पुण्यकालः २३ जनवरी प्रातः ०२:२९ वादनात्- प्रो. बिहारीलालः शर्मा



**हिमसंस्कृतवार्ताः- वाराणसी।** सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयस्य (वाराणसी) कुलपतिः प्रो. बिहारीलालशर्मा जनसामान्यं सूचितवान् यत् विद्या- ज्ञान- वाचां अधिष्ठात्री देवी मातुः सरस्वत्याः कृते समर्पितः पावनः बसन्तपञ्चमी पर्वः अस्मिन् वर्षे गुरुवारवासे, २३ जनवरी २०२६ दिनाङ्के शास्त्रीयविधि-विधानेन श्रद्धया च मानयिष्यते। कुलपतिः प्रो. शर्मा उक्तवान् यत् विश्वविद्यालयस्य ज्योतिषविभागेन उपलब्धैः प्रामाणिकपञ्चाङ्गैः, धर्मशास्त्रीय- मान्यताभिः ज्योतिषीयगणनाभिः च अनुसारं बसन्तपञ्चमी (माघशुक्ल पञ्चमी) तिथिः २२ जनवरी २०२६ दिनाङ्कस्य मध्यरात्रौ २३ जनवरी दिनाङ्कस्य प्रातः ०२:२९ वादने आरप्स्यते, या २४ जनवरी २०२६ दिनाङ्कस्य प्रातः ०१:४६ वादनं यावत् प्रभावी भविष्यति। एवं प्रकारेण एषा तिथिः २३ जनवरी दिनाङ्के सम्पूर्णदिवसं, २४ जनवरी दिनाङ्कस्य प्रातः ०१:४६ वादनं यावत् विद्यमाना भविष्यति। सः स्पष्टं कृतवान् यत् शास्त्रीय- सिद्धान्तस्य **“तिथिं समनु प्राप्त उदयं याति भास्करः”** इत्यस्यानुसारं, २३ जनवरी २०२६ दिनाङ्के पञ्चमीतिथेः सूर्योदयेन सह संयोगः भवति, अतः अयमेव दिवसः बसन्तपञ्चमीपर्वणे श्रीसरस्वतीपूजनाय च मुख्यरूपेण मान्यः भविष्यति। अपि च, मध्यरात्रौ अपि पञ्चमीतिथिः अवशिष्टा अस्ति, अतः २४ जनवरी २०२६ दिनाङ्के सूर्योदयं यावत् विद्यारम्भः, ज्ञानदानम्, जप-तपः पूजनादिकर्माणि च कर्तुं शक्यन्ते। प्रो. शर्मा सूचितवान् यत् ज्योतिषीयदृष्ट्या अस्मिन् वर्षे बसन्तपञ्चम्यां मकरराशौ सूर्यस्य मीनराशौ च चन्द्रस्य संयोगः, पूर्वाभाद्रपदनक्षत्रं तथा शिवयोगस्य विशेषप्रभावः वर्तते, यत् ज्ञान- विद्या- बौद्धिकसाधनायै अत्यन्तं शुभं मन्यते। विशेषरूपेण २३ जनवरी २०२६ दिनाङ्के प्रातः ०७:५६ वादनात् अपराह्णे ०१:५९ वादनं यावत् श्रीसरस्वतीपूजनाय विद्यारम्भाय च श्रेष्ठमुहूर्तः उपलब्धः अस्ति। कुलपतिः प्रो. शर्मा अवदत् यत् बसन्तपञ्चमी भारतीयसंस्कृतौ ऋतुपरिवर्तनस्य, नवचेतनायाः, सृजनशीलतायाः, कलायाः बौद्धिकजागरणस्य च प्रतीकपर्व अस्ति। अयं दिवसः विद्यार्थिनां, शिक्षकाणां, साधकानां शोधार्थिनां च कृते विशेषरूपेण कल्याणकारी मन्यते। अस्मिन् अवसरे शिक्षणसंस्थाभिः विद्यालयैः सांस्कृतिकसङ्घटनैः च विविधाः धार्मिक-सांस्कृतिक-शैक्षणिककार्यक्रमाः आयोज्यन्ते। अन्ते प्रो. बिहारीलालशर्मा जनसामान्यं प्रति आह्वानं कृतवान् यत् ते उपर्युक्ततिथिं, पुण्यकालं मुहूर्तं च ध्यानं निधाय मातुः सरस्वत्याः आराधनां कुर्वन्तु तथा च बसन्तपञ्चमीपर्व श्रद्धा- शान्ति- ज्ञानसाधना- उल्लासैः सह मानयन्तु।


हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

नन्दिनीः नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

काव्याः नमस्ते नन्दिनि। अद्य केचन विचित्राः विषयाः मया पठिताः सन्ति।

नन्दिनीः सत्यम्। प्रथमतः देहली-नगरे यमुना-नद्यां सुखद-नौकायानस्य आरम्भः आगामि-मासे निश्चितः अस्ति। एषा व्यवस्था सर्वकारेण कृता अस्ति।

काव्याः जल-विहारस्य वार्ता तु उत्तमा, परं विदेशस्य राजनीतिः अपि विचित्रा। अमेरिकादेशस्य वर्तमान-अध्यक्षेण ट्रम्प-महोदयेन हरितभूमिं (Greenland) प्राप्तुं पुनः उद्योगः कृतः। तेन उक्तं यत् शान्ति-पुरस्कारस्य अभावात् एषः निर्णयः स्वीकृतः अस्ति।

नन्दिनीः अध्यक्षस्य विचाराः तु दुर्बोधाः, परं सङ्गीतं तु आह्लादकरम्। राजस्थान-प्रदेशे शाकिरा-महोदयायाः प्रसिद्ध-गीतस्य लोक-संस्करणं रचितम्। 'खम्मा घणी' इति शब्देन सह तत् गीतं जनैः बहु इष्टम् अस्ति।

काव्याः गायनं तु मधुरम्, परं नगरे एकेन अशिष्ट-पुरुषेण रेल-स्थानके सार्वजनिक-रूपेण मूत्र-त्यागः कृतः। तस्य अशिष्टाचारस्य दृश्यं चलच्चित्रे मुद्रितम् अस्ति।

# विद्यायाः महत्त्वम्

विद्यायाः, अर्थात् शिक्षायाः प्रकृतार्थो यत् ज्ञानस्य आहरणं, तथा तदनुसारञ्च जीवने आचरणञ्चेति। उक्तमस्ति यत्-

**"विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं, विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं, विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।।"**

अर्थात् विद्या हि मनुष्यस्य सौन्दर्यं, गुप्तधनं, गुरोरपि गुरुः, भ्रमणकाले परमबन्धुः, परमदेवः, राजस्थाने चापि पूज्यते विद्येयं, न वा धनं पूज्यते। तस्माद् विद्यायाः परमं महत्त्वं वर्णयितुं न शक्यते। परन्तु यः विद्याहीनः, सः पशुतुल्यः कथ्यते। मानवस्य आचरण- प्रवृत्त्यादिकं यथासाध्यं संशुद्ध्य तं विशेषजीवत्वेन आनेतुं यः प्रयासः, तदेव शिक्षायाः लक्ष्यम्। अतीतकालतः वर्तमानकालपर्यन्तं शिक्षायाः अर्थविषये नानाविद्वज्जनैः विविधं मतपोषणं कृतमस्ति इत्यतः शिक्षायाः प्रकृतार्थः केवलं ज्ञानाहरणमात्रेऽपि सीमाबद्धस्तु नैव खलु। एतस्याः अर्थः व्यापकः विस्तृतश्च वर्तते। मानवस्य सामाजिकजीवनारम्भस्य समनन्तरं हि शिक्षायाः अपि आरम्भः भवति। अनेन सामाजिक- जीवनमाध्यमेन प्रमुखजनाः समाजसदस्येभ्यः प्रयोजनानुसारं नानाविधां शिक्षां प्रदत्तवन्तः आसन्। आधुनिकसमाजस्य इव अतीतसमाजस्य जटिलता तावती नासीत्, इत्यतः तदानीन्तनी शिक्षाप्रणाली अत्यन्तं सरला सुकरा च आसीत्। समयपरिवर्तनस्य समनन्तरं हि समाजस्यापि परिवर्तनं जातम्। सभ्यतायाः प्रगतिः, एवं देशस्य प्रयोजनानुसारं शिक्षापद्धतिः इति द्वयोरपि परिवर्तनम् अभवत्। शिक्षा हि आधुनिकसमाजस्य एकं मूलम् उपकरणम् इति परिगणितं जातम्। एतस्य कारणम् अतीतसंस्कृतिः एवं सभ्यता शिक्षाद्वारा हि अवगन्तुं शक्येते। शिशुः जन्मप्राप्तेः अनन्तरं हि न कामपि अभिज्ञतां प्राप्तुमर्हः। तस्य वाक्शक्तेः, अङ्गप्रत्यङ्गानाञ्च किञ्चित्प्रमाणेन परिपुष्टिसबलादिकं यदा भवति तदा हि शिशुः भङ्गध्वनिनाः वक्तुं प्रयतते। परिवारस्य मध्ये क्रमशः शिशुः एधते। माता, पिता, परिवारस्य अन्यसदस्यः इत्यादिभ्यः सः नानाविषयान् शिक्षते, अभिज्ञताञ्च प्राप्नोति। एवमेव क्रमशः सः प्रयोजनीयं ज्ञानं लभते। नानाविधपरिस्थित्याः एवम् अवस्थायाः माध्यमेन शिशुः स्वकीयं भावं प्रकाशयितुं सक्षमः भवति। सुस्थं सरलं सुखी सफलञ्च जीवनं यापयितुं मानवाय बहूनां विषयाणां ज्ञानम् आवश्यकं भवति। एतत्सर्वं ज्ञानं केवलम् अभिज्ञतामाध्यमेन हि आत्मसात् कर्तुं न कोऽपि प्रभवति। अतः तस्य कृते शिक्षानुष्ठानस्य आवश्यकता भवति। निर्दिष्टानुष्ठानमाध्यमेन हि प्रयोजनीयः ज्ञानराशिः आयत्तीकर्तुं शक्यः। शिक्षा मानवजीवनस्य अविच्छेद्या प्रधाना च अङ्गस्वरूपा। एतां विहाय मानवजीवनम् असम्पूर्णम्। शिक्षा एका जीवनप्रवाहभूता एवं गतिशीलधारणेयम्। शिक्षायाः प्रकृतार्थस्य उद्घाटनम् इतोऽपि न जातम्, तद्विषयसम्बन्धानाम् आलोचनानाम् इतोऽपि परिसमाप्तिर्न जाता। इयं मानवजीवनस्य धारावाहिकप्रवाहभूता। शिक्षामाध्यमेन मानवः चिन्ता- सांस्कृतिकधारणादिभिः नूतनं जीवनमार्गम् अन्विष्य, बुद्धिज्ञानादीनां प्रसारेण जगति शुभाशुभविषयिणीं विचारशक्तिम् अधिगच्छेत्। वस्तुतः शिक्षामाध्यमेन एव मनुष्यः पशुत्वं विहाय मनुष्यत्वं प्राप्नुयात्, किमधिकं देवत्वमपि अधिगन्तुं शक्नुयात्। अतः जीवने सच्छिक्षायाः अत्यन्तम् आवश्यकता अस्ति यत् तत् निराकर्तुं न शक्यते कदापीति, शुभम्।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# "लौकिकन्यायकोशः"

## "चौरापराधात् माण्डव्यनिग्रहन्यायः"

एकदा केचन चौराः राजभवने चौर्यं कृतवन्तः। ते धावित्वा पलायनं कर्तुम् आरभन्त तदा राजसेवकाः तेषाम् अनुसरणं कृतवन्तः। धावन्तः चौराः माण्डव्यनामकस्य ऋषेः समीपे धनकोषं त्यक्त्वा अदृश्याः अभवन्। राजसेवकाः तत्र आगत्य माण्डव्यमहर्षिम् एव चौरं मत्वा तं बद्ध्वा राजसपीमं नीतवन्तः। राज्ञा तु शूलारोपणदण्डः दत्तः। निरपराधेन अपि माण्डव्यमहर्षिणा दण्डः भोक्तव्यः अभवत्। एवम् अकृतस्यापि कर्मणः फलं भोक्तव्यं भवति इति द्योतयितुम् अस्य न्यायस्य प्रयोगो भवति। यथा- सर्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शने- भेदवादिनं प्रति इमानि दूषणानि उद्घुष्यन्ते किं वा धार्मिभेदवादिनं प्रति? प्रथमे चौरापराधात् माण्डव्यनिग्रहन्यायापातः। {पृष्ठे ७३}

डा वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्